# MASTER OF ARTS EXAMINATION, 2022

( 2nd Year, 4th Semester )

## SANSKRIT

### COURSE – XIX/A

### ( SANSKRIT DRAMA )

Time : Two hours — Full Marks : 30

*The figures in the margin indicate full marks.*

**विभाग-क**

१. अधोलिखिताः प्रश्नाः देवनागरीलिपिमाश्रित्य संस्कृतभाषया च समाधेयाः।

क) विरुद्धयोर्भृशमिह मन्त्रिमुख्ययोर्महावने वनगजयोरिवान्तरे।
अनिश्चयाद् गजवशयेव भीतया गतागतैर्ध्रुवमिह खिद्यते श्रिया॥
— अत्र वक्ता कः? 'मन्त्रिमुख्ययोः' इत्यनेन कौ सूचितौ? कस्मिन् प्रसङ्गे उक्तमिदम्? $\frac{1}{2}+1+1$

ख) 'अत्र नगरे अमात्यराक्षसेन सह प्रथमं समुत्पन्नस्नेहबहुमानास्त्रयः पुरुषाः देवस्य चन्द्रश्रियः श्रियं न सहन्ते'
— अत्र वक्ता कः? कमुद्दिश्य कदा स इदमुक्तवान्? अत्र के तावत् त्रयः पुरुषाः? $\frac{1}{2}+\frac{1}{2}+1+\frac{1}{2}$

२. अधोलिखितेषु **द्वयमा**श्रित्य प्रसङ्गनिर्देशपूर्वकं तात्पर्यं लेखनीयम्। $5\times2=10$

क) स्वयमाहृत्य भुञ्जाना बलिनोऽपि स्वभावतः।
गजेन्द्राश्च नरेन्द्राश्च प्रायः सीदन्ति दुःखिताः॥

ख) दानाम्बुराजिरिव गन्धगजस्य नाशे।
तत्रैव किं न चपले प्रलयं गतासि॥

[ Turn over



ग) प्रज्ञाविक्रमभक्तयः समुदिता येषां गुणा भूतये।
ते भृत्या नृपतेः कलत्रमितरे सम्पत्सु चापत्सु च॥

**विभाग-ख**

३. अधोलिखिताः प्रश्नाः देवनागरीलिपिमाश्रित्य संस्कृतभाषया समाधेयाः।

क) 'ननु जनक एवास्माकमभिन्नः' — अत्र कः वक्ता? कामुद्दिश्य वक्ता इदमुक्तवान्? जनकः कः? $\frac{1}{2}+\frac{1}{2}+\frac{1}{2}$

ख) 'स्वभावः खल्वसौ स्त्रीपिशाचीनाम्' — अत्र कः वक्ता? कामुद्दिश्य वक्ता इदमुक्तवान्? 'स्त्रीपिशाची' इत्यनेन अत्र का सूचिता? $\frac{1}{2}+\frac{1}{2}+\frac{1}{2}$

ग) ज्वलन्निवाभिमानेन ग्रसन्निव जगत्त्रयीम्।
भर्त्सयन्निव वाग्जालैः प्रज्ञयोपहसन्निव॥
— कमवलम्ब्य इयमुक्तिः क्रियते? सः कुतः कस्मिन् स्थाने आगच्छति? $\frac{1}{2}+\frac{1}{2}+\frac{1}{2}$

घ) मुक्तिक्षेत्ररूपेण का नगरी निरूपिता? तत्र दम्भः कस्मात् कारणात् आगतः? $\frac{1}{2}+1$

४. अधोलिखितेषु **द्वयमा**श्रित्य प्रसङ्गनिर्देशपूर्वकं तात्पर्यं लेखनीयम्। $4\frac{1}{2}\times2=9$

क) एकामिषप्रभवमेव सहोदराणामुज्जृम्भते जगति वैरमिति प्रसिद्धम्।
पृथ्वीनिमित्तमभवत् कुरुपाण्डवानां तीव्रस्तथा हि भुवनक्षयकृद्विरोधः॥

ख) प्रत्यक्षादिप्रमासिद्धविरुद्धार्थाववोधिनः।
वेदान्ता यदि शास्त्राणि बौद्धैः किमपराध्यते॥

ग) निहतस्य पशोर्यज्ञे स्वर्गप्राप्तिर्यदीष्यते।
स्वपिता यजमानेन किं नु कस्मान्न हन्यते॥